VIPRASAMDESAM

R
S
V
I
12317

015,1
N
12317

कुम्भराजपबकविः

॥ श्रीः ॥

आर्यभाषाविभूषः

श्रीलक्ष्मणसूरिविरचितं

627

विप्रसंदेशम्।

तंजानगरे

श्री पूर्णचन्द्रोदयमुद्राक्षरशालायां

मुद्रितम्

१९०६.

मूल्यम् ४ अणकाः

(Copyright Registered.)

146
12317
12317

॥ श्री ॥

॥ विप्रसंदेशम् ॥

कान्तारीती रसिकहृदयग्राहिरीती यदीये
तानावात्सीन्नृपतितिलको भीष्मकाख्यो विदर्भान् ।
प्राप्योदन्वानिव सुरतरून् पञ्च पुत्रान् स लेभे
कन्यारत्नं गुणिषु पुरुषेपूत्तमेनोपभोग्यम् ॥ १ ॥

हित्वा राज्ञो हृदि कलयतः सादरं रुक्मिणी सा
विज्ञायैषामिव कृपणतामर्थनालाघवेन ।
वव्रे कान्तं यदुपरिवृढं चेतसा लोककान्तं
सर्वो वाञ्छत्यलघु लघु वा वस्तु सत्त्वानुरूपम् ॥ २ ॥

तस्य श्रुत्वा चरितममृतास्वादसत्कण्टमाना
तत्संकल्पैः किमपि किमपि व्यालिखन्ती स्वचित्ते ।
चैद्याय द्रागतिखलमतावग्रजे दित्सति स्वं
कालाम्भोदे सृजति भिदुरं कोकिनीवाकुलाभूत् ॥ ३ ॥

निश्चित्यान्यं तृणमयमिव श्रीपतावेकताना
तत्प्रत्यर्थिन्यथ निजजने स्वार्थनाशं विशङ्क्य ।
त्रस्तात्मानं सपदि निरयादात्मनोद्धर्तुकामा
विप्रं प्रत्नं सुकृतमिव सा मूर्तमग्रे ददर्श ॥ ४ ॥

गोप्तुं मन्त्रं वदितुमुचितं वेदितुं चोक्तिसारं
दक्षे तस्मिन् सुविदितगुणे सिद्धिमुत्प्रेक्षमाणा ।

प्रेष्ठाय स्वप्रसभहरणप्रार्थनामर्पयिष्य-
न्त्यभ्यर्च्यैनं सुतनुरवदत्प्राश्रित सुश्रुतं च ॥ ५ ॥

वक्त्राज्जन्म त्रिभुवनगुरोः शान्तिरात्मा श्रुतं दृक्
सत्यं वित्तं बलमपि तपः सर्वमत्यूर्जितं ते ।
तस्माद्ब्रह्मन् क्वचिदशरणा साध्वमभ्यर्थये त्वां
सूते चिन्तामणिरिव सतां संगतिश्चिन्तितार्थान् ॥ ६ ॥

त्वं मे बन्धुर्द्विजवर निजैर्बन्धुभिः प्रोज्झितायाः
यद्वत्कण्वः परमकरुणो लालितायाः शकुन्तैः ।
अर्थाधीना निजपरभिदा यो हितैषी स बन्धु-
र्हित्वा स्वार्थानशरणमृगीतर्णकस्येव योगी ॥ ७ ॥

तद्विस्रब्धं हृदयमिव मे त्वामनन्यैकवेद्ये
मङ्गल्येऽद्य त्वरयति मनः क्वापि संदेष्टुमर्थे ।
तत्र स्वार्थो भवति परमस्ते ध्रुवं देवतार्था-
त्पीयूषात्प्रागिव जलनिधौ रत्नलाभो मुरारेः ॥ ८ ॥

कुर्युः शोभामनुगुणगुणा एव भूषाविशेषाः
स्थाने स्थाने तदुचिततया संनिविष्टाश्च दूनाः ।
नार्हत्यर्हंस्त्वदत इतरो गन्तुमभ्यर्हितेऽत्र
स्थातुं चूडामणिभुवि तुलाकोटिरीष्टे न जातु ॥ ९ ॥

वक्तव्यं मे बहु हृदि गतं संनिकृष्टो विवाहः
कालक्षेपे न भवति मतिर्वर्त्मनो वर्णनेन ।
किं चाज्ञानां विषय उचितश्चार्थवांश्चोपदेशो
ज्ञातार्थेषु त्वयमविनयाद्धुक्कुरज्ञानतो वा ॥ १० ॥

यावद्दिव्या मधुरमधुरा नारदास्यारविन्दा-
त्कर्णप्रान्तं प्रविशति कथा कापि वाचामभूमिः ।
तावत्तेन त्वरितपतितो-वर्त्मना मानसं मे
रन्ध्रान्वेषी प्रसभमहरद्रोपिकाचित्तचोरः ॥ ११ ॥

तेन व्याप्तं जगदिव मनो भास्वतेव स्वधाम्ना
तत्सारूप्यं मरकतमणीगर्भवारीव नीतम् ।
सम्यग्गुप्तं पुरमिव परैरप्रवेश्यं कृतं च
ध्यानारूढं मन इव मुनेर्वीतचापल्यशल्यम् ॥ १२ ॥

चन्द्राम्भोजप्रभृतिषु गुणा ये मनोरञ्जकाः स्यु-
स्तेषामेकायनमयमपामापगेशो यथा वा ।
तस्मादस्मिन् स्वरसमधुरो भावबन्धो बुधानां
न ह्युत्फुल्ले सुरभिणि सुमे षट्पदप्रेरणास्ति ॥ १३ ॥

तस्मिन्मूर्खा अहह जगदानन्दकन्देऽपि कृष्णे
द्वेषं धूका इव च शलभाः कुर्वते चित्रभानौ ।
आस्तां वैतत्कथनमधुना प्रस्तुतेऽर्थे प्रशस्ते
पापात्मा हि स्मृतिपथगतो हन्ति पुण्यं पुराणम् ॥ १४ ॥

किं मे भद्रं निरुपधि भवेदर्जितं जन्मकोट्या
येनैतस्मिन्व्यतिकर इह प्रादुरासीन्महात्मन् ।
मन्ये नावा समनुपगतं सर्वतोऽम्भःपरीते
सीदन्तीं मामवितुमगतिं चोदितं त्वां नियत्या ॥ १५ ॥

पद्मं मीनाहतमिव मुहुः स्पन्दते मेऽक्षि वामं
हर्षो रोम्णामयमविरलः कोरकाणामिवाङ्गे ।

धत्ते पद्माकर इव शरद्येष आत्मा प्रसादं
गुञ्जन् भृङ्गः श्रवसि वदतीवागमं सख्युरग्रे ॥ १६ ॥

तस्मादद्य द्विज मम कृते द्वारकां यातुमर्ह-
स्यब्धेः कुक्षावुरगनगरीं तद्भयादुत्थितां वा ।
यामीक्षित्वा परिकलयितास्यद्भुतं त्वष्टृशिल्पं
भाति व्यक्तं ननु शुकुरवत्कर्तृबुद्धिः क्रियायाम् ॥ १७ ॥

यत्रोपास्ते हरिमविरतं स्वर्गभूतिं सुधर्मां
द्यौकित्वास्मा अपि सुमनसे शङ्कितो मेघवाहः ।
प्रायो दृष्टाः क्वचन दमिता नित्यशो दण्डपाणे-
र्विभ्यत्यस्मात्खलविषधरा अप्युदासीनवृत्तेः ॥ १८ ॥

अन्येऽप्येवं दिगधिपतयस्तत्प्रदत्ता विभूतीः
प्रत्यर्प्यास्मिन् पुनरपि ततः प्रीतिमादित्समानाः ।
सम्राजोऽन्ये नृपतय इव प्रत्यहं यत्र सज्जाः
संवन्यन्ते समयकृतया सेवया साधु सेव्याः ॥ १९ ॥

गेहे गेहे किल शुककुलैर्द्वारदेशस्थितैरि-
त्यादिश्यन्ते नवनवतयाभ्यागता यत्र लोकाः ।
धावत्यायुर्निमिषनिमिषे संनिधत्ते च मृत्यु-
र्हित्वा सर्वं जपत शिवदं कृष्ण कृष्णेति मन्त्रम् ॥ २० ॥

कालीयोऽसावयमघ इयं पूतना चेति तांस्तान्
कृत्वा कृष्णस्त्वहमहमिति स्पर्धमानान्विहारे ।
क्रीडालोलानपि हरिमयान्वीक्ष्य रथ्यासु बालान्
शङ्के यस्यां तव पथि भवेत्तत्र तत्रान्तरायः ॥ २१ ॥

द्वारोपान्ते सुविहिततया रत्नकुड्येषु यस्या-
मालेख्यस्थे जनपदजनैर्भाविते तथ्यबुद्ध्या ।
नानालीलावसरसमृणे बालगोपालबिम्बे
सक्तां दृष्टिं हर कुलुकितां मा स्म भूर्विस्मृतार्थः ॥ २२ ॥

शोच्यो लोकः पशुरिव हरौ यस्तु भक्तिं न कुर्या-
दित्युक्तानां निजगुरुजनैरप्यभक्तोऽपि कृष्णे ।
वर्तेतास्मिन् जगति पुरुषेष्वित्युदारां शिशूनां
पृच्छां कुर्वन् श्वसि मनसा विक्रिरिष्यस्यभद्रान् ॥ २३ ॥

गायन्तीनां हरिगुणगणान् हर्म्यपृष्ठेषु यस्यां
गानैः क्षीणामखिलवरसां भक्तिमाधाय चित्ते ।
आकर्षद्भिः खगमृगशिशून् स्थाणुभिद्भेदयद्भिः
पूर्णे कर्णे न हि तव दशां भाविनीं निश्चनोमि ॥ २४ ॥

यात्रां तूर्ये ध्वनयति विभोः संभ्रमेणोत्थितानां
यत्र क्षीणामनुपदमपि स्यान्महो दर्शनेऽस्य ।
चक्षुष्मत्ता भवति जगतां यस्य सांनिध्यमात्रा-
त्स प्रत्यग्रो दिनमणिरिव प्रेक्ष्यते प्रत्यहं च ॥ २५ ॥

प्रासादानामुपरि मिलितास्तस्य यात्रोत्सवेषु
प्रौढौत्सुक्यादनिमिषदृशो यत्र नारीः सुरीश्च ।
भक्त्यानूनाः पुरवरदृशामात्मनाथाभिमान-
प्रेमोद्दामैः प्रमदसलिलैः शक्ष्यसि त्वं विवेक्तुम् ॥ २६ ॥

प्रस्थानस्थो यदि यदुपतिः स्यात्तदा भाग्यतस्ते
भक्त्यावश्यं हृदयकमले तच्च रूपं निधेयम् ।

काले काले जलधर इव प्रेक्षणीयामभिख्या-
मन्यामन्यां वहति स विभुः श्रेयसे कामरूपो ॥ २७ ॥

आयान्तं त्वासुलभमतिथिं देवबुद्ध्यातिशेयाः
श्रान्तं यस्यामकृपणधियः श्रद्धयाभ्यर्चयेयुः ।
नावज्ञेयो भवति हि विभोरग्रिमोऽसौ प्रसादो
यास्य प्रीतिर्निजजननजने सा स्वभक्तेऽपि न स्यात् ॥ २८ ॥

तद्धि श्राव्यं स्वयमभिसरेद्येन धीर्वासुदेवे
त्रातुं मृत्योरयमलमलं मानसैकव्यपेक्षः ।
नास्त्यन्योऽस्मादिति गुरुकुले शिक्ष्यमाणान् कुमारान्
श्रुत्वा यस्यां सुहितहृदयो निर्वृतिं यास्यसि त्वम् ॥ २९ ॥

विद्यावृद्धान्विनयसरलांस्तेजसा दुष्प्रधर्षा-
नृद्ध्यानूनानपि धनपतेर्निःस्पृहान् धर्मनित्यान् ।
विप्रान्नित्यं वितरणपरान् प्रेक्षमाणस्य ते स्या-
द्ब्रह्मण्यत्वं स्फुटमवगतं तस्य वादान्यकं च ॥ ३० ॥

यज्ञेशस्य प्रयतमनसो यत्र तस्य प्रपश्ये-
रिज्याव्यग्रान्विधिविनिहितक्रियाभिः क्रियाभिः ।
अप्रत्यक्षं किमपि निगमश्रद्धया राधयन्ति
त्रैविद्या यं क्रतुवितितिभिः किं पुनस्तं पुरःस्थम् ॥ ३१ ॥

पुञ्जीकृत्यापणभुवि चितेर्वीचिहस्तोपनीतै-
रन्यैः सिन्धोरपि च मणिभिर्नित्यमुच्चीयमाना ।
स्रष्टुं लोकानिव मणिमयान् व्यर्थमन्तर्निमग्नै
रत्नैः सर्वैरपि भगवता भाति या संभृता नौः ॥ ३२ ॥

प्रत्याधारं प्रकृतिमधुरं स्वच्छमृद्धं च तोयं
तोये तोये कमलनिलयालालनीयं च पद्मम् ।
पद्मे पद्मे प्रणयललितं वीक्ष्य हंसं च यत्र
स्मर्तासि त्वं मुनिमनसि संक्रीडमानस्य शौरेः ॥ ३३ ॥

यस्यां विद्युत्कपिशवसनः सान्द्रगम्भीरनाद-
श्चक्षुष्योऽसौ नवजलधरच्छायकायो धनुष्मान् ।
याने याने मदयतितरां बर्हिणो बर्हचूडो
धुर्योऽजस्रं भवति हि सकृत्तोषितस्तोषणेऽस्य ॥ ३४ ॥

त्रातुं लोकान् सह तदधिपैश्चक्रिणा पालितायां
कर्तुं चैतान् पुनरपरथा यत्र योधाः क्षमन्ते ।
येऽवज्ञाता अतिजडतया तेऽपि चौजस्वियोगा-
दोजायन्ते स्वलु रविरुचेवोपलाः स्पृश्यमानाः ॥ ३५ ॥

यत्रोद्यानं प्रचलति हरावुत्सुके तत्समृद्ध्या
कल्यं वृक्षाः किमपि जननं प्रार्थयन्ते खगोक्त्या ।
वाञ्छन्त्यन्ये झटिति भगवत्प्रीणनं जन्म तादृ-
ग्व्यत्याशंसां दधति सुकृतेष्वन्यदीयेष्वपूर्णाः ॥ ३६ ॥

तत्र श्रीमद्भवनमवनीगर्वसर्वस्वमूलं
लक्ष्यं लक्षैरमरनगरायाममानैर्विमानैः ।
यत्रैवास्ते निखिलभुवनक्षेमचर्यासु धुर्यो
दूराद्दूरं लघु मम मनश्चुम्बकाश्मेव कर्षन् ॥ ३७ ॥

यस्य द्वारे चिरतरमनासादितान्तःप्रवेशाः
पृथ्वीपालैः सममवसराकाङ्क्षिणो लोकपालाः ।

तत्र ब्रह्मन् सपदि गमितो द्वारपालैः प्रवेशं
विज्ञातासे कियदिति जगत्यात्मजातेर्महत्त्वम् ॥ ३८ ॥

एवं लक्ष्मीपतिगृहगतस्तत्र लक्ष्मीविलासान्
साक्षात्कुर्वन् धनपतिशतैरप्यचिन्त्यानुभावान् ।
आक्रष्टासि द्रुतमधिपुरि व्यापृतां चित्तवृत्तिं
सर्वश्चोपर्युपरि च भवन् फल्गु पश्यत्यधोऽधः ॥ ३९ ॥

ब्रह्मादीनां भवति महिमा यत्प्रसादस्य लेशा-
त्सा श्रीर्भक्त्या परिचरति यत्पादपद्मे अजस्रम् ।
तस्यावासस्थलमुपगतः किं नु मीमांसितासे
विप्रात्मानं प्रतनतपसा मंस्यसे धन्यधन्यम् ॥ ४० ॥

संदेशार्थं कमपि हरये दूरतस्त्वाहरन्तं
निश्चिन्वाना गृहपरिजना इङ्गितैरिङ्गितज्ञाः ।
संभ्रान्तास्ते पथिकसुखदान् कुर्युरर्होपचारा-
नन्यं कार्यं खलु मतिमतां श्रान्तविश्रान्तिदानम् ॥ ४१ ॥

विश्रान्तः सन् पुनरपि ततो नीयमानोऽन्तरन्तः
कर्षं कर्षं कथमपि दृशं मज्जतीं तत्र तत्र ।
यावद्यावत्परिसरभुवं नूनमस्यासि याता
तावत्तावत्तव कलिलता स्यादनल्पैर्विकल्पैः ॥ ४२ ॥

किं मां देवः परिजनसुखादाह्वयेत्किं नु पश्ये-
त्किं मे दद्यात्क्षणमवसरं किं नु भाषेत सौम्यम् ।
किं वा पृच्छेदभिगमफलं श्रावितार्थं च किं मा-
मङ्गीकुर्यादुत परिहरेत्स्वेणदूत्येन वेति ॥ ४३ ॥

न ह्येतस्मिन् प्रणिहितधियां कामितं जातु मोघं
तीर्थोत्सृष्टं धनमिव भवेद्भूयसेऽर्थाय कामम् ।
नैष क्षुद्रानपि परिहरेद्वत्सलः स्वान् कथंचि-
न्मन्दांश्छात्रान् गुरुरिव शनैरुत्तमत्वं निनीषेत् ॥ ४४ ॥

नास्य प्रीत्यै भवति हि कुले जन्म विद्याथ वान्य-
स्त्रीयेतासौ निरुपधिकया केवलं भावशुद्ध्या ।
तिष्ठत्येव क्षितिसुरकुले सर्वसंस्कारदीप्ते
तत्पत्नीभ्यो व्यतरदनघां सद्गतिं सद्गतिं स

तत्सांनिध्यं व्रज विगतभीर्देवतास्तस्य विप्रा
मानस्थाने परिभव इव व्यर्थया शङ्कयालम्
स्त्रैणी याच्ञा महति पुरुषे सिद्धये वा न वा स्...
ब्रह्मण्येऽत्र त्वदुपगमनादिष्टसिद्धिः करस्था ॥ ४६ ॥

पश्यस्येनं द्विजवर यदा स्यात्तदासौ स्वपित्रोः
शुश्रूषायामवहितमना दर्शयंस्तन्महत्त्वम् ।
कल्यं कामं भजतु जनता शैशवे यावकल्यं
वह्वायासैः स्वयमपुषतां तौ गुरू विस्मरेत्कः ॥ ४७ ॥

यद्वा सोऽसौ क्वचन सचिवैरुद्धवाद्यैर्विविक्ते
पाण्ड्यस्य प्रणयनपरो मन्त्रयेतार्थतन्त्रः ।
देशे काले वपति विधिवद्यस्तु संध्यादिबीजं
तस्याक्षय्यं क्षितिरिव फलं नीतिधेनुः प्रदुग्धे ॥ ४८ ॥

बन्धूनां वा भृशविमनसां धार्तराष्ट्रोपरोधा-
त्स्यादक्रूरं तदुपहितधीः प्रेषयन् सान्त्वनाय ।

R S V L 12317
SANSKRIT PATHA PUSTHA LI... 12317

तादृक् प्रीतिः पितरि न भवेन्नो जनन्यां न रामे
नास्य स्वात्मन्यपि यदुपतेर्यादृशी पाण्डवेषु ॥ ४९ ॥
पृच्छन्वायं सविनयमृषीन् पूजयन्वेदमातुः
सावित्र्याः स्यात्किमपि परमं तत्त्वमत्यादरेण ।
श्रेयः पुंसोऽनवधि निहितं यत्र सर्वं विधात्रा
दारुण्यग्निः पयसि च घृतं यद्वदन्तर्निगूढम् ॥ ५० ॥

शृण्वन्वा स्याद्बहसि सखिभिर्वर्ण्यमाना नृपाणां
धन्याः कन्याः कुतुकितमना यौवनस्था युवासौ ।
तन्मे भाग्यं खलु यदिह मे प्रस्तुते संप्रदाने
स्वस्थो लब्धप्रशमनतया स प्रभुर्दारकाङ्क्षी ॥ ५१ ॥

संदर्भेऽस्मिन् स्वयमुपगतं त्वां स्वचिन्तानुकूलं
प्राज्ञो वक्रे विशदिव फलं जातु न क्षेप्तुमिच्छेत् ।
आहूतोऽन्तः परिचित इवाकुलात्मा गभीरं
स्वस्तीत्युक्त्वा प्रविशतु भवान्नागरिक्यैव वृत्त्या ॥ ५२ ॥

उन्मादस्थाश्चिरमिव यदास्वादतोऽद्यापि गोप्यो
यच्छोभेन भ्रमरवदिदं मानसं वम्भ्रमीति ।
श्रुत्यन्तेषु श्रवणपुटतः पीतपूर्वं त्वया य-
त्तच्चक्षुभ्यामपि मधु पिबेर्निर्विशन्निर्विशङ्कम् ॥ ५३ ॥

इति श्रीलक्ष्मणसूरिविरचिते
विप्रसंदेशे
पूर्वभागः

॥ उत्तरभागः ॥

वेद्यो वेदैः श्रुतिषु कुशलं सत्यवांस्तथ्यवाचं
धर्मत्राता विमलचरितं शीलवन्तं सुशीलः ।
वर्षीयांसं गुरुषु विनतः शान्तमत्यन्तसौम्यः
प्रत्युत्थाय प्रभुरभिमुखं मानदो मानयेत्त्वाम् ॥ १ ॥

सूक्ष्मज्ञा यं परमपुरुषं याच्ञया पद्मयोनेः
प्राहुः पृथ्व्यां दितिसुतभरध्वंसनायावतीर्णम् ।
अभ्युत्थानं व्रजति तु यदा ग्लापयिष्यन्नधर्मो
धर्मं गोप्तुं सृजति हि तदा स्वात्मनात्मानमेषः ॥ २ ॥

यत्प्रौढस्य प्रथितचरितं तत्र शङ्कान्यथा स्या-
न्मर्त्येनैव प्रबलतपसा शक्तिरासादितेति ।
उत्पत्त्यैव ज्वलति महितं यस्य तेजो यथाग्नेः
कस्याशङ्का भवतु सुधियस्तस्य चामानुषत्वे ॥ ३ ॥

पश्योदग्रं किमपि शिशुनानिर्दशेनैव येना-
पीतप्राणा विहितजनतायातना पूतनासीत् ।
देहात्तस्या निरयसदृशाद्वह्निना दाह्यमाना-
च्चित्रं धूमस्त्वगरुसुरभिर्यस्य संस्पर्शतोऽभूत् ॥ ४ ॥

कंसोत्सृष्टैरघबकतृणावर्तवत्सादिसूत्रै-
र्बालक्रीडायशसि वसने यस्य विस्तीर्यमाणे ।
वत्सान् हृत्वा सरसिजभुवा यस्य संमोहनार्थं
व्यामूढेन स्वयमतिचिरं तत्र चित्रांबभूवे ॥ ५ ॥

वर्षन्नभ्रैः प्रलयसचिवैर्गोत्रभिच्छान्तदर्प-
श्चक्रे च्छत्रं विरचितवता येन गोवर्धनाद्रिम् ।
युक्तं चैतत्पृथुभुजभृतां ये विपक्षीकृता यै-
स्तैरेवैतान्दमयति रिपूनात्मना दत्तहस्तैः ॥ ६ ॥

कालीयाहेः शिरसि विशदं वीक्ष्य यत्पादमुद्रां
यद्वाहः सन्नहिभुगमुतो भीतपूर्वाद्विभेति ।
आर्तत्राणे कृतपरिकरस्तद्विरुद्धं चरत्सु
क्षिप्रं धत्ते दममविषमः स्वेषु वान्येषु वा यः ॥ ७ ॥

स्नान्तं यादःपतिरसमये नन्दगोपं निगृह्ण-
स्तन्मोक्षार्थं गृहमुपगतं यं तु साम्नोपतस्थे ।
तत्रागोऽभूद्व्रजपहरणं न त्वकालेऽभिषेको
गत्या भानोरयनमिव यद्वर्त्म कुर्वन्ति शास्त्रम् ॥ ८ ॥

प्रत्याहार्षीत्पितृपतिगृहाच्छ्रिरात्माक् प्रभासे
नष्टं पुत्रं पुनरपि गुरोर्दक्षिणो दक्षिणायै ।
नैताच्चित्रं भवति विदुषां वास्तवं यस्य तत्त्वं
लीलामात्राचरितभुवनस्तोमसर्गादिकस्य ॥ ९ ॥

सिंहस्वप्नाद्व्रज इव भियैवार्धनष्टः कियान् स्या-
त्कंसो यस्येश्वरदमयितुः पीतसिन्धोरिवान्धुः ।
तस्य ध्वंसस्तदपि महितो लोकपीडानिवृत्या
क्षुद्रस्यापि प्रभवति मुदे वृश्चिकस्य प्रमाथः ॥ १० ॥

आ सत्यादा भुजगभुवनादा च दिक्चक्रवाला-
त्कीर्तिर्यस्याखिलमपि तथा व्याप्नुशेऽल्पैरहोभिः ।

आ गोष्ठीसंवननजननादा शिशूल्लालनार्था-
न्नान्यद्देयं समजनि यथा यत्प्रबन्धानुबन्धात् ॥ ११ ॥

यद्यत्कर्म श्रुतिषु विहितं लोपशान्त्यै क्रियाणां
तस्मिंस्तस्मिन् स्वयमुपहते तस्य दोषस्य साम्यात् ।
भूरिश्रान्ताः क्रतुसकलतामीप्सवो यस्य नाम
प्रायश्चित्तं परममविदन्योगिनः कर्मवित्ताः ॥ १२ ॥

यत्सौभाग्यं नवजलधरे या रुचिः शक्रनीले
यत्सौन्दर्यं कुवलयदले दृश्यता या तमाले ।
तत्सर्वं यद्वपुषि विलसत्यैकरस्येन रस्यं
पौष्पं नानागति मधु यथा भ्रामरे मध्वपूपे ॥ १३ ॥

किं क्षीराब्धेरतिपरिचयाद्द्रष्टुमभ्यागतोर्मि-
श्चन्द्रज्योत्स्ना किमु परिचरत्यात्मनोऽक्षय्यतायै ।
किं वा गङ्गा प्रवहति पुनः किं नु वोर्ध्वा श्रुतीनां
चूडामुक्तात्विडिति बहुधा तर्क्यते यन्नखश्रीः ॥ १४ ॥

काञ्चादिम्नः पृथुमुखमणेः पद्मरागस्य रागैः
पृक्तच्छायं कनकवसनं भासुरं यो वसानः ।
धत्ते शोभामरुणमहसा मिश्रितैः पत्युरङ्गां
वालैरुस्रैः शबलरुचिमन्मेखलस्योदयाद्रेः ॥ १५ ॥

सौन्दर्यं कः कथयितुमलं यस्य वक्षःस्थलस्य
स्वप्नेऽपि श्रीः परिहरति नो यत्पदं चञ्चलापि ।
यद्गर्भस्थो मदनसचिवश्चन्द्रमाः सर्वकाम्यः
श्रीवत्साङ्को वहति सुषमां यत्र चान्वर्थनामा ॥ १६ ॥

धुर्यस्तम्भावखिलजगतां यद्भुजौ केचिदाहुः
शङ्कन्तेऽन्ये त्वपथगहने गच्छतां कृष्णसर्पौ ।
इच्छन्त्येके भुवनजयिनः पञ्चबाणस्य बाणौ
योगक्षेमौ कलितवपुषौ तर्कये भक्तिभाजाम् ॥ १७ ॥

यद्द्रष्टव्यं खलु जनिमता सर्वयत्नैरवश्यं
यत्र स्वान्तं जललवणवल्लीयते स्वात्मनैव ।
यस्यौपम्यं न किमपि भजेत्तत्प्रसादैकसारं
स्वस्य स्वेन स्फुरति सदृशं यन्मुखं यन्मुखं वा ॥ १८ ॥

आच्छिद्यास्यादिव मृगपतेस्त्रातमम्भोधिमध्या-
दुद्धृत्येव प्रशमितरुजं गुप्तमैन्द्रादिवास्त्रात् ।
मृत्योः स्थानात्त्वरितममृतस्थानमारूढवन्तं
मत्वात्मानं स्वपिति स सुखं यत्कटाक्षाञ्चलार्हः ॥ १९ ॥

यस्मिन्नल्पाक्षरमतिरसं भावगर्भं प्रसन्नं
स्मित्वा किंचिद्ददति सकलो दत्तकर्णोऽवधत्ते ।
न ग्राम्यत्वं न च परुषतां नापि नेयार्थतां वा
पुष्टार्थेऽस्मिन् वचसि निपुणोऽपीक्षतेऽण्वप्यवद्यम् ॥ २० ॥

प्राज्ञो विद्वान् शुचिरनलसः प्रश्रितोऽतिप्रगल्भः
पूर्वाभाषी मधुरवचनो युक्तकारी वदान्यः ।
आपद्बन्धुः परमकरुणः संभृतश्रीः श्रितार्थे
स त्वां पृच्छेत्प्रभुरवनतः पूजयन्नासनाद्यैः ॥ २१ ॥

कच्चिद्ब्रह्मन्नसि कुशलवान् स्वागतं तेऽस्तु को वा
धन्यो देशो नरपतिरपि ब्रूहि गार्हस्थ्यतस्ते ।

कीदृश्या नः स्वयमभिलषन्याञ्चयानुग्रहीतुं
नो मन्दोऽपि प्रचलति कथा किं पुनस्त्वादृशा ये ॥ २२ ॥

संपूर्णानां कृपणजनवद्व्यर्थना चेतसि स्या-
त्सानुग्राह्ये तदपि कृपया दृश्यते प्रेरितानाम् ।
विश्वामित्रो ननु दशरथं रामभद्रं ययाचे
निर्बध्यैनं जनकसुतया तत्सुतं योजयिष्यन् ॥ २३ ॥

तन्निःशङ्कं कथय भगवन्नागतस्त्वं यदर्थं
जानीथास्तत्कृतमिति मया दुष्करं यद्यपि स्यात् ।
श्रेयस्कामो भवति विमुखः संमुखीने फले क-
स्तद्धचक्षण्यं क्षयिणि भुवने विग्रहस्तेषु दत्तम् ॥ २४ ॥

पृष्टस्त्वेवं प्रकृतमुचितं किंचिदुक्त्वा ब्रुवीथा
वैदर्भी किं श्रुतिपथगता भीष्मजा रुक्मिणी ते ।
सैषा बाल्यात्त्वयि कृतमतिस्तद्विरुद्धं प्रदाने
प्रक्रान्ते त्वां बहु मम सुखाद्याचते संनतेति ॥ २५ ॥

आकर्ण्यैतन्नल इव नृपे हंसवाक्यं मुकुन्दे
प्रीतिस्निग्धं कुतुकित इव त्वां समुद्वीक्ष्य भूयः ।
किं मे ग्राह प्रणयवचनं सेति संपृच्छमाने
यद्वक्तव्यं तदवहितधीर्मत्कृते ब्रूहि तत्र ॥ २६ ॥

श्रुत्वा तादृक्तव यदुपते रूपमुत्कण्ठिताहं
तत्प्रत्यूहाद्धरि निपततस्त्रातुमभ्यर्थये त्वाम् ।
का वा प्राज्ञा त्वयि सति जगन्मङ्गलेऽन्यं वृणीत
त्यक्त्वा चन्द्रं न खलु भजते कौमुदी धूमकेतुम् ॥ २७ ॥

नीतस्तेऽङ्घ्रिं कमलनयन त्वद्गुणैर्मेऽन्तरात्मा
पश्यन्नास्ते त्वदभिगमनं नित्यमात्मा तु बाह्यः ।
सेवातौल्ये फलविषमता तावकानां न युक्ता
कुर्वीथास्तत्त्वयि न निपतेद्येन वैषम्यदोषः ॥ २८ ॥

रत्नं पुंसामधिगुण वरं त्वामवज्ञाय मौर्ख्या-
द्रुक्मी चैद्ये कृतबहुमतिर्मा स्म गादिष्टसिद्धिम् ।
त्वद्भागं मां हर सह हठात्कृत्य कीर्त्या रिपूणां
सिंहग्राह्यं स्पृशतु न बलिं ग्रामसिंहो नृसिंह ॥ २९ ॥

नाधर्मोऽत्र प्रसजति मनाग्धर्मविद्भिः प्रशस्ये
सम्यक्कृतं भवति शरणापन्नरक्षाव्रतं ते ।
क्षात्त्रश्चैवं विधिरनुसृतो मुख्यमाहुर्हि राज्ञां
शाणस्थानं बलमदजुषां राक्षसोद्वाहमार्याः ॥ ३० ॥

कस्त्वां वीर प्रसहितुमलं मागधं प्राज्यवीर्यं
पश्यञ्शश्वत्समिति भवताध्यापितं भङ्गविद्याम् ।
यत्रासन्ने दिनकृति यथा सत्त्वशङ्कापि येषां
तेषां भानामिव तदुदये का कथा विक्रमस्य ॥ ३१ ॥

रुन्ध्युर्मार्गं यदि मदहता मां रथे कुर्वतस्ते
तन्मे भाग्यं खलु नयनयोरीर्ष्यतोः श्रोत्रवृत्त्यै ।
नेतः पूर्वं न च परमपि द्रष्टुमर्हा मया या
प्रत्यक्षा सा भवति भवतो नाथ सांग्रामिकश्रीः ॥ ३२ ॥

भग्नोत्साहे प्रतिनृपकुले पाञ्चजन्यस्य घोषा-
द्रुक्मी तेन प्रशममभजन्नभ्यमित्यो यदि स्यात् ।

संग्रामात्तं विमुखय तव स्यालगन्धानुबन्धं
सद्भिर्बन्धायविदितनये कार्यमेतावदेव ॥ ३३ ॥

आलोड्यैवं गज इव सरः कुण्डिनं तत्र शत्रू-
न्विद्राव्य द्रागिव जलखगान् कीर्तिमुद्भाव्य नव्याम् ।
आप्तैर्भृङ्गैरिव समनुगैर्गीयमानापदानो
हस्तेकृत्य व्रज जनमिमं पद्मवत्पद्मिनीमिन् ॥ ३४ ॥

अर्चिर्वह्नेरिव घृतवतो वर्धते मानसे मे-
भूयांस्तापः स्मृतवति दृढं तापशान्त्यै भवन्तम् ।
नैष न्याय्यः खलु तव कृते त्वज्जनस्योपताप-
स्तं मे शृण्वन् कुरु समुचितं तत्प्रतीकारमाशु ॥ ३५ ॥

नौदासीन्ये न च विहरणे नो विविक्ते न गोष्ठ्यां
नाकल्पे वा न मृदुशयने नान्नपानीययोर्वा ।
नान्तर्वाह्येष्वपि न च दिवा नापि नक्तं न सायं
नान्यस्मिन्वा क्वचन रमते त्वां विना मानसं मे ॥ ३६ ॥

संतापं ते वद सुवदने न ज्वरो नो निदाघः
कम्पश्चायं प्रसरति मुहुर्नेह शैत्यं न भीतिः ।
निःश्वासस्ते कथमविरतो नामयो नापि शोको
निर्बध्यैवं मयि विमनसि क्लिश्यते ह्यालिवर्गः ॥ ३७ ॥

यं यं पश्याम्यलिमभिमुखं खे पतन्तं खगं वा
तस्मिन् कृत्वा क्षणमिव भवद्भूतबुद्ध्याभिमानम् ।
नष्टे त्वस्मिन् पुनरपि मनोराज्यसौख्यान्निवृत्ता
निर्विद्येऽहं विधिविनिहता स्वाशयाज्जीविताच्च ॥ ३८ ॥

आयात्यग्रे नवघनरुचिर्दीर्घबाहुर्महात्मा
क्रीडाखेलं पथि जनतयी मुक्तमार्गोऽनुयान्त्या ।
इत्याकर्ण्य त्वमिति कुतुकात्किंचिदुत्तम्भिताङ्गी
हस्तीत्युक्ते सुचिरमगमं लब्धनाशानुतापम् ॥ ३९ ॥

विद्युन्मेघाविव सुरुचिरौ लोकवन्द्यानुभावा-
वन्योऽन्यस्मिन्नकपटदृढप्रीतियोगाभिरामौ ।
सीतारामौ क्वचन लिखितौ वीक्ष्य चाशंसुरासं
किं नामेदृग्मम च भविता कृष्णयोगेन भाग्यम् ॥ ४० ॥

स्वप्ने जातु स्वयमुपगतं श्रद्धयाभ्यर्चयन्ती
तूष्णीकं त्वामयि दयित मे किंनु वा सोपहारे ।
अर्घे प्रीतिं न कुरुष इति प्रार्थयन्ती ततः किं
वक्ष्ये नर्मच्छलकुतुकिनस्ते विवासाः कृतास्मि ॥ ४१ ॥

धृष्टं कर्षन्नुरसिजपटं कर्णयोश्चाटु जल्पन्
कुर्वन् हासं मुहुरपि मुखं चोन्नमय्य प्रचुम्बन् ।
पीतोऽसि त्वं मधु किमिति संरब्धमुक्तो न पीतं
पास्याम्यद्येत्यधरमपिबो गोपकन्याभुजंग ॥ ४२ ॥

आकृष्याथ प्रभयचलिता गाढमाश्लिष्यमाणा
नाहं वेद स्वमपरमपि प्रोत्कटानन्दलीना ।
जागर्याद्या अनुभवगता याः प्रशस्ता अवस्था-
स्ताभ्योऽन्या मे समजनि तदा देव शृङ्गारदेव ॥ ४३ ॥

स्तोके तस्मिन् क्षयिणि सुकृते वञ्चितालिङ्गना ते
कामिन् कान्त व्रजसि कथमित्युत्थिता संभ्रमेण ।
बुद्ध्वा स्वप्नं विधुरविवशा संगताभिः सखीभिः
पृष्टोत्स्वप्नं प्रणयमधुरं ताभिराश्वासिताऽस्मि ॥ ४४ ॥

कस्ते कान्तः कथय जगदाह्लादको यः किमिन्दु-
र्यः पद्मेष्टः किमहरधिपो योऽसितात्मा किमब्धिः ।
यः शृङ्गारी किमु स मदनस्तस्य संमोहनो यो
ज्ञातं कृष्णः कनकलतिके कल्पवृक्षं भजेति ॥ ४५ ॥

तत्स्वादेन स्थगितहृदये भो हृषीकेश चित्ते
सिंहाक्रान्ते वन इव गजा नेन्द्रियार्था विशन्ति ।
स्मारं स्मारं तव विलसितं चारु रूपं च मे धी-
स्तत्संभेदे कलयति मुहुर्मज्जनोन्मज्जनानि ॥ ४६ ॥

संकल्पानामिति बहुशतैर्हर्षशोकादिमूलैः
संतानेनाविरतमुदितैस्तप्यमानामजस्रम् ।
किं मां पश्यन्नपि न कुरुषे संनिधिं नेतुमिच्छां
निर्द्वन्द्वानामपि खलु भवेद्वृत्यदुःखेन दुःखम् ॥ ४७ ॥

याच्ञैषा मे यदि न घटते दैवयोगादिदानीं
तप्स्ये तीव्रं पुनरपि तपस्त्वत्पदप्राप्तियोग्यम् ।
जह्यां वेमां तनुमितरथा किं बहूक्त्यैष सर्गः
कृष्णादन्यं कमपि मनसा रुक्मिणी नो वृणीते ॥ ४८ ॥

उद्वाहस्य प्रथमदिवसे कन्ययाराधनीया
देवी गौरी प्रयतमनसा पादचारेण गत्वा ।
एषोऽस्माकं कुलविधिरतः श्वस्तथा तामुपास्य
प्रत्यायान्त्या मम तव रथारोपणाय प्रसीद ॥ ४९ ॥

प्रह्लादं यो झटिति निपतन् स्तम्भमध्यादरक्षीः
क्रन्दन्तं च द्विपमशरणं नक्रवक्त्रादुदास्थः ।
पृथ्वीमब्धेः पुनरुदहरस्तस्य ते कोऽत्र भारः
मज्जन्तीं मां व्यसनजलधौ दीननाथोद्धरेति ॥ ५० ॥

दिङ्मात्रं मे कलय गदितं तन्निसृष्टार्थ देवो
येन प्रीतो भवति वचसा तद्धि कृष्णानयैनम् ।
अद्यैव त्वं व्रज यदुपुरं सेतुबन्धे न मान्द्यं
कार्यं वारि प्रवहति पुरायाहि सिद्ध्या नमस्ते ॥ ५१ ॥

इत्युक्तेन त्वरितगतिना तेन विप्रेण कृष्णः
संदिष्टार्थः सपदि कुतुकी प्राप्य तद्राजधानीम् ।
गौरीधाम्नः कियदिव बहिर्निःसरन्तीं वराङ्गीं
गुप्तां योधैर्बहुभिरभितो भीष्मकन्यां ददर्श ॥ ५२ ॥

पद्भ्यां किंचित्कणितकटकं मन्दमन्दं चलन्ती-
माकल्पेन व्रतसमुचितेनातिरम्यामपाङ्गैः ।
आन्विष्यन्तीं मुहुरुभयतस्ताक्ष्यकेतुं शताङ्गं
संमोह्यान्यान् हरिरिव सुधां लीलया तां जहार ॥ ५३ ॥

युद्धोन्नद्धानरिपरिवृढान् हेलयोत्सार्य दूरं
कृत्वा वध्यं यदपि विमतं रुक्मिणं प्राणशेषम् ।
दत्त्वा भव्यं कविषु च यशः प्राप्य स स्वं निवासं
भैष्म्याः पाणिग्रहणमकरोत्सुप्रशस्ते मुहूर्ते ॥ ५४ ॥

मैत्र्याद्याभिश्चतसृभिरपि प्रोज्ज्वले दीपिकाभि-
र्दिव्यां पूजां भजति नवधा भिन्नया सुष्ठु भक्त्या ।
श्रद्धाभद्रासनपरिगतौ चारुकल्याणवेषौ
चेतोरङ्गे मम विहरतां रुक्मिणीवासुदेवौ ॥ ५५ ॥

॥ इति श्रीलक्ष्मणसूरिविरचिते विप्रसंदेश उत्तरभागः ॥

ओं तत्सत्

12317

